## जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः। (१५०/३१३०)

जुप्रभृतिभ्यो [1]धातुभ्यो युच् प्रत्ययो भवति [2]तच्छीलादिषु कर्तृषु। [3]जु इति सौत्रो धातुः[4]। जवनः। चङ्क्रमणः। दन्द्रमणः। सरणः। गर्धनः। ज्वलनः। शोचनः। लषणः। पतनः। पदनः। चलनार्थानां पदेश्च ग्रहणं सकर्मकार्थमिह[5]। [6]ज्ञापनार्थं च पदिग्रहणमन्ये वर्णयन्ति, ताच्छीलिकेषु [7]मिथो वाऽसरूपविधिर्नास्ति इति। तेन अलङ्कृञः तृन् न भवति [8]अलङ्कर्ता इति। तथाहि पदेरुकञा विशेषविहितेन [9]सामान्यविहितस्य युचोऽसरूपत्वात् समावेशो [10]भवेदेव, किमनेन विधानेन? [11]ज्ञापनार्थं पुनर्विधीयते। प्रायिकं चैतद् [12]ज्ञापकम्। क्वचित् समावेश इष्यत एव, [13]गन्ता खेटं विकत्थनः॥

## क्रुधमण्डार्थेभ्यश्च। (१५१/३१३१)

'क्रुध कोपे' (धा. पा. ११९०), 'मडि भूषायाम्' (धा. पा. १५८८) [14]इत्येतदर्थेभ्यः च धातुभ्यो युच् प्रत्ययो भवति[15]। क्रोधनः। [16]रोषणः। [17]मण्डनः। भूषणः॥

## न यः। (१५२/३१३२)

यकारान्तात् धातोः[18] युच् प्रत्ययो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। [19]क्नूयिता। क्ष्मायिता[20]॥

## सूददीपदीक्षश्च। (१५३/३१३३)

[21]सूद दीप दीक्ष इत्येतेभ्यश्च[22] युच् प्रत्ययो न भवति[23]। [24]अनुदात्तेत्त्वात् प्राप्तः प्रतिषिध्यते। सूदिता। दीपिता। दीक्षिता[25]। ननु च दीपेर्विशेषविहितो रप्रत्ययः [26]दृश्यते, 'नमिकम्पिस्म्यजसकमहिंसदीपो [27]रः' (३. २. १६७/३१४७) इति, स एव बाधको [28]भविष्यति, किं प्रतिषेधेन? वाऽसरूपेण [29]युजपि प्राप्नोति। ताच्छीलिकेषु च वाऽसरूपविधिर्नास्ति इति प्रायिकमेतद् इत्युक्तम्। तथा च समावेशो दृश्यते, कम्रा युवतिः, कमना युवतिः, कम्प्रा शाखा, कम्पना शाखा इति[30]। सूदेः [31]युचि प्रतिषिद्धे कथं मधुसूदनः, [32]रिपुसूदनः इति? अनित्योऽयं प्रतिषेधः इति योगविभागाद् विज्ञायते। अथवा मधुसूदनादयो नन्द्यादिषु [33]द्रक्ष्यन्ते। '[34]कृत्यल्युटो बहुलम्' (३. ३. ११३/२८४१) इति ल्युडन्ता वा॥

---

1. दशभ्यः इत्यधिकम् अ. 2. तच्छीलादिषु कर्तृषु नास्ति फ. ह. 3. जुस् फ. 4. वर्गे वर्तते इत्यधिकम् फ. 5. इह नास्ति अ. ह. 6. ज्ञापकार्थं च ह, ज्ञापकार्थं च परिग्रहणं ब, च नास्ति अ. 7. मिथो नास्ति ह. 8. अलङ्करणम् ह. 9. सामान्यविहितो युज् असरूपत्वात् समाविशत्येव अ. 10. सिद्ध एव ह. 11. ज्ञापकार्थं अ. ब. क. ह. 12. ज्ञापकम् नास्ति ह. 13. गन्ता वेदं विकत्थन एव ह, गन्ता खेलं विकत्थनः अ. क, गन्ता स्वेरं विकसनः ब. 14. इत्येव फ. 15. तच्छीलादिषु कर्तृषु इत्यधिकम् ब. 16. शोषणः क. 17. मण्डार्थेभ्यः इत्यधिकम् अ. ब. क. ह, मण्डनार्थेभ्यः च इत्यधिकम् ड. 18. तच्छीलादिषु कर्तृषु इत्यधिकम् ब. 19. क्नेयिता ह. 20. तृन् इत्यधिकम् ड. 21. सूदादिभ्यः धातुभ्यः फ. 22. धातुभ्यः इत्यधिकम् ड. 23. तच्छीलादिषु कर्तृषु इत्यधिकम् ब. 24. अनुदात्तेत् इत्यतः ग. ह. 25. तृन् इत्यधिकम् ड. 26. दृश्यते नास्ति ब. फ. 27. र प्रत्ययः फ. 28. भवति फ. 29. अपि नास्ति फ. 30. इति नास्ति फ. 31. युच् प्रतिषिद्धः ह. 32. बलसूदनः फ. ह, नास्ति अ. क. 33. दृश्यन्ते फ. ह. 34. वाक्यमिदं नास्ति अ. ब. क. ड. फ. ह.